॥ श्रीः ॥

श्रीवैशेषिकनय

न्यायसुधाकूतम्

प्रातःस्मरणीय
श्रीमत्सत्यध्यानतीर्थश्रीचरणप्रियान्तेवासिना
श्रीसात्विकगुरुराजाचार्यसूनुना
परमपूज्य पण्डितराज
श्री जालिहाळश्रीनिवासाचार्येण
विरचितम्

प्रकाशकः

गोपालकृष्णाचार्यः जालिहाळ

1994

Scanned with CamScanner

|| श्रीः ||

श्रीवैशेषिकनय

न्यायसुधाकूतम्

प्रातःस्मरणीय

श्रीमत्सत्यध्यानतीर्थश्रीचरणप्रियान्तेवासिना

श्रीसात्विकगुरुराजाचार्यसूनुना

परमपूज्य पण्डितराज

श्री जालिहाळश्रीनिवासाचार्येण

विरचितम्

प्रकाशकः

गोपालकृष्णाचार्यः जालिहाळ

1994

।। श्रीगुरुराजो विजयते ।।

किञ्चिन्निवेदनम्

इदमत्र प्रस्तूयते परमपूज्यानां श्रीजालिहाळाचार्याणां संसेवनीयोऽयं पुनरेको ग्रन्थावतारः समेषां विदुषां हस्तकमलमधिरोपित इति । पुण्यतमेऽस्मिन् पूज्याचार्यीये पुण्यस्मरणमहोत्सवे प्राकाश्यं नीयमानोऽयं कृतिवरः स्वाभिधयैव स्वप्रतिपाद्यमावेदयतीति नात्र लेखन्याः कश्चिदवसरः । को नाम न वेत्ति विद्वान् वैशेषिकाधिकरणन्यायसुधावाक्यार्थगाम्भीर्यचातुर्यादिकम् ? को वा समग्रमास्वादयितुं शक्तः श्रीमत्सौधसौन्दर्यादि ? श्रीमद्वेदान्तसाम्राज्यसंरक्षणाय प्रवृत्तेऽस्मिन्नधिकरणरणे दुर्युक्तिदौर्योधनैस्सार्धं प्रयुद्ध्यतोरनुव्याख्यान न्यायसुधाख्ययोः वृकोदरधनञ्जययोः वैशेषिकमतमर्दनकौशल्यं वैराटराज्यगोगण रक्षणमहायुद्धं स्मारयति । शतवारं श्रुतवतोपि वैशेषिकाधिकरण सौधवाक्यार्थानुवादः नातिसुलभ इति विषये न विदुषां विशयलेशोऽपि । गहनेऽस्मिन्ननूदने प्रवृत्ताऽस्मदाचार्यविलक्षणधिषणा विश्वविचक्षणगणतोषिणीति न स्तोकोऽपि संशयः । अनुवादपरेऽस्मिन् ग्रन्थे तत्र तत्र पेटिका निर्माणपरिष्करणादिना पूज्याचार्यप्रतिभाप्रभाऽन्यूनस्वीयनावीन्येन किमप्यलौकिकं कौतुकमध्येतृहृद्यादधातीत्यत्र पण्डितमण्डलमेव प्रमाणम् । दिगन्तविश्रान्तशुद्धोदन्तानां प्रातःस्मरणीय श्रीसत्यध्यानतीर्थश्रीचरणान्तेवासिनां श्रीसात्विकाचार्यज्येष्ठतनूजानां अस्मत्पितृपादानां परमपूज्यानां श्रीजालिहाळाचार्याणां पूण्यस्मरणरूपेऽस्मिन् भावसंवत्सरीयमहोत्सवे एतद्ग्रन्थप्रकाशनेन सर्वे गुरवः तथा श्रीमन्मध्वाचार्यस्तदन्तर्यामी कुलस्वामी लक्ष्मीवेङ्कटेशः सुप्रसन्ना वरदा भवन्त्विति संप्रार्थ्य विरमामि विस्तरतः ।

निवेदयिता

गोपालकृष्णाचार्यः जालिहाळोपाह्वः

धारवाड
मार्गशीर्ष-शद्ध-द्वादशी
14-12-1994

C publishers

Copies 500

श्रीगुरुभ्यो नमः
श्रीपरमगुरुभ्यो नमः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः

परमपूज्य पण्डितराज
श्रीजालिहाळ श्रीनिवासाचार्य विरचितम्

श्रीवैशेषिकनयन्यायसुधाकूतम्

॥ ॐ ॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ॐ ॥

स्मारं स्मारं श्रियः कान्तं पातं पातं गुरोः पदे ।
वैशेषिकनयन्यायसुधाकूतं प्रकीर्तये ॥

निराकरणबीजम्

वैशेषिकमते ईश्वराङ्गीकारेऽपि तद्धर्मेषु सृष्टिप्रलयविधौ च विप्रतिपत्तेः तन्निराकरणाभावे समन्वयप्रतिरोधात् युक्तस्तन्निराकरण सन्दर्भः ॥

१.ईश्वरजीवनिरूपणम्

अनन्तगुणवन्तमीश्वरमष्टगुणवन्तं मन्यन्ते । ते च गुणाः ज्ञानप्रयत्नेच्छासंख्यापरिमाणपृथक्त्वसंयोगविभागाः । जीवस्तु बुद्धि सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाभिः नवभिर्विशेषगुणैर्युक्तः । ईश्वरस्य नित्ययथार्थज्ञानत्वात् मोहाभावः । तस्माच्च तन्मूलकद्वेषाभावः । ततश्च तत्प्रभवधर्माधर्माभावः । स्मृत्यभावात् भावनाभावश्च । अखण्डत्वं (एकत्वं) ईश्वरज्ञानादीनाम् ॥

Scanned with CamScanner

२. सृष्टिप्रक्रिया

ब्रह्मवर्षशतान्ते नित्यवर्गे धर्माधर्मसंस्कारपाकजपार्थिव परमाणुरूपादिकेऽनित्यवर्गे स्थिते सति सर्गासाधारण कारण सम्बन्धवत्वरूपविशिष्टेच्छारूपायां ईस्वरस्य सिसृक्षायां सत्यां तया संसारिसमवेतधर्माधर्मलक्षणादृष्टेषु सहकारियुक्तेषु सत्सु अदृष्टवदात्म संयोगैः क्रियावन्तः परमाणवो भवन्ति । तादृशसंयुक्त परमाणुद्वयेन द्व्यणुकं पूर्वमसदेव जायते। द्व्यणुकत्रयेण त्र्यणुकम्। चतुर्भिःत्र्यणुकैः चतुरणुकम् । ततश्चानियतैस्तैस्तैः खण्डावयविभिः अन्त्यावयविनां शरीरेन्द्रियविषयाणां सम्भवः। गुणानां कर्मणां च स्वाश्रयद्रव्येषूत्पादः। सर्वमपि भावरूपं कार्यं समवाय्यसमवायि निमित्तकारणजन्यम् । समवायसम्बन्धावच्छिन्नकार्यतानिरूपित तादात्म्यसम्बन्धावच्छिन्न कारणतावत्वं समवायिकारणत्वम् । समवायसम्बन्धावच्छिन्नकार्यता निरूपितसमवायस्वसमवायिसमवेतत्वैतदन्यतरसम्बन्धावच्छिन्नकारणतावत्वमसमवायिकारणत्वम् । तदुभयभिन्नकारणत्वं निमित्तत्वम् । द्व्यणुकादिकार्योत्पत्तौ परमाण्वादेः समवायिकारणत्वम्। अवयविगुणे अवयवगुणस्य च परमाण्वादिसंयोगस्यासमवायिकारणत्वम् । ईशकालादृष्टादेः निमित्तकारणत्वम्॥

३.पदार्थनिरूपणम्

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः । गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यलक्षणम्। सामान्यवत्वे सति असमवायिकारणत्वे सति अस्पन्दात्मकत्वं गुणलक्षणम् । चलनात्मकत्वं कर्मलक्षणम्। नित्यत्वे सति नित्यद्रव्यमात्रवृत्तित्वं व्यावृत्तिमात्रहेतुत्वं

वा विशेषलक्षणम् । अयुतसिद्धसम्बन्धत्वं नित्यसम्बन्धत्वं वा समवायस्य लक्षणम् । अवश्यमाश्रयाश्रयिभावेनावास्थितत्वमयुतसिद्धत्वम् । गुणा द्रव्याणि च नित्यानित्यभेदेन द्विविधानि । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव द्रव्याणि । रूपादयश्चतुर्विंशतिर्गुणाः । उत्क्षेपणादीनि पञ्च कर्माण्यनित्यानि । परमपरं चेति द्विविधम् सामान्यम् । कार्यगतगुणान् प्रति कारणगतगुणाः असमवायिकारणम् । विधिर्भावः । निषेधोऽभावः ॥

४. कार्यकारणभावे विलक्षणविषयप्रतिपादनम्

कारणगतपरिमाणस्य कार्यगतपरिमाणकारणत्वमिति सिद्धान्तेऽपि परिमाणविशेषेऽन्यथाभावोऽस्ति । त्र्यणुकमहद्दीर्घत्वयोः द्व्यणुकगताणुत्वह्रस्वत्वे न कारणे । द्व्यणुकगुणस्य ह्रस्वत्वस्य अणुत्वस्य परमाणुवर्तमानं पारिमाण्डिल्यं न कारणं च । त्र्यणुकादिगतमहत्वदीर्घत्वे च चतुरणुकादिपरिमाणासमवायिकारणम् । सजातीययोरेव कार्यकारणभावात् द्व्यणुकत्र्यणुकपरिमाणयोः सजातीयत्वाभावात् न कार्यकारणभावः। तथा च प्रयोगः द्व्यणुकत्र्यणुकपरिमाणे न कार्यकारणभाववती विजातीयपरिमाणत्वात् व्यतिरेकेण तन्तुपटपरिमाणवत् । परमाणोरणुत्वस्यापि न द्व्यणुकाणुत्वकारणत्वम् । नित्यपरिमाणत्वस्य परमाणुत्वस्य तत्र वैरूप्यस्य सत्वात् । द्व्यणुकत्र्यणुकपरिमाणानां ईश्वरबुद्धिमपेक्ष्योत्पन्ना परमाण्वोर्द्वित्वसंख्या द्व्यणुकेषु उत्पन्ना त्रित्वसंख्या च कारणमिति रहस्यम् ।

॥ इति तार्किकमतोपन्यासः ॥

५.पारिमाण्डिल्यहेतुत्वे अनुमानानि

पारिमाण्डिल्यस्याहेतुत्वमुपपत्तिविरुद्धम् । तथा हि - त्र्यणुक द्व्यणुकपरिमाणं स्वाश्रयसमवायिकारणपरिमाणजं कार्यपरिमाणत्वात् चतुरणुकादिपरिमाणवत् । द्व्यणुकपरमाणुपरिमाणं सदृश परिमाणारम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् त्र्यणुक परिमाणवत् । त्र्यणुकद्व्यणुके परिमाणारब्धसदृश (सजातीय) परिमाणवती कार्यद्रव्यत्वात् चतुरणुकादिवत् । द्व्यणुकपरमाणू स्वसदृशपरिमाणासमवायिकारणपरिमाणवन्तौ द्रव्यसमवायिकारणत्वात् त्र्यणुकवदिति अनुमानानां पारिमाण्डिल्यस्य कारणत्वे जागरूकत्वात् । न चाद्यस्य तूलपिण्डपरिमाणे, द्वितीयस्य तूलपिण्डावयवपरिमाणे, तृतीयस्य तूलपिण्डे, चतुर्थस्य तूलपिण्डावयवे व्यभिचार इति वाच्यम् । पक्षतुल्यत्वात् । न च प्रचयकारणता ग्राहकप्रमाणेन बाधः । तस्योभयकारणताकत्वेऽप्युपपत्तेरबाधात् । द्वयोरपि क्लृप्तशक्तित्वेनोभयकारणत्वस्याङ्गीकार्यत्वात् । न च द्व्यणुक परिमाणं त्र्यणुकपरिमाणाजनकं परिमाणत्वात् पटपरिमाणवदिति सत्प्रतिपक्षः । तत्समवायिकारणपरिमाणत्वाभावस्योपाधित्वात् । त्र्यणुकपरिमाणं चतुरणुकपरिमाणाजनकं परिमाणत्वात् इत्यादि आभासतुल्यत्वाच्च । न चाणुपरिमाणान्यत्वं अणुद्रव्यभिन्नत्वं चोपाधिः त्र्यणुकचतुरणुकादावपि अणुपरिमाणसत्वस्य व्यवस्थापयिष्यमाणत्वेन साध्याव्यापकत्वात् पक्षाव्यावृत्तत्वेन साधनव्यापकत्वाच्च परिमाणावान्तरजातेरयोगात् त्र्यणुकादौ महत्ववत् परमाणु द्व्यणुकयोरणुत्ववच्च परिमाणस्यैवैकजातीयत्वं अपकर्षोत्कर्षवत्वमेव ।

तस्मात्परकीयानुमानस्यासिद्धिश्च । न च द्व्यणुकादिपरिमाणस्य संख्ययैव जन्मसम्भवात् तस्य परमाण्वादिपरिमाणाजन्यत्वे बाधकाभावादप्रयोजकत्वमुक्तानुमानानामिति शङ्क्यम् । समवायि कारणप्रत्यासन्नत्वेन प्रमितेनासमवायिकारणत्वस्य परिमाणादौ सिद्ध त्वात् । अन्यथा लक्षणस्यातिव्याप्त्यापत्तेः । तद्भिन्नत्वस्य लक्षण प्रवेशे सर्वत्राप्येवं सुवचत्वेनासम्भवापत्तेः । एतन्मात्रलक्षणे तत्प्रवेशे बीजा भावात् । अप्रवेशे बाधकाभावाच्च । अनन्यथासिद्धनियतपूर्ववृत्तित्वेन कारणत्वावधारणेनाजन्यत्ववाचोऽयुक्तत्वात् । अन्यथा चतुरणकादि परिमाणस्यापि स्वावयवपरिमाणाजन्यत्वापातः । न च सदृशपरिमा णस्यैव कारणत्वं न विसदृशस्येति वाच्यम् । एकजातीयत्वरूपसादृ श्यस्य साधितत्वात् । न च वैलक्षण्यमात्रेणाकारणत्वम् । तर्हि त्र्यणुक महत्वस्याप्यकारणतापत्तिः । न च संख्यात एव जन्मेति वाच्यम् । तथा सति चतुरणकादि परिमाणदावपि तथात्वापत्तेः । न चोक्तानुमानैरेवं साधनं सिद्धान्तविरुद्धं सिद्धान्ते परिणामवादाङ्गीकारादिति वाच्यम् । परीत्या परदूषणे प्रवृत्तत्वेनादोषात् ॥

६. प्रतितर्कपराहतिः

ननु प्रतितर्कपराहतान्यनुमानानि । तथा हि परमाण्वादि परिमाणात् द्व्यणुकादिषु अणुत्वं वा महत्वं वा ह्रस्वत्वं वा दीर्घत्वं वाऽपद्यते । नाद्यः सर्वकार्याणामप्रत्यक्षत्वप्रसङ्गात् । महत्वसमानाधि करणोद्भूतरूपस्पर्शवत्वस्य प्रत्यक्षत्वव्यापकत्वात् । अणुत्वे महत्वायोगात् । न द्वितीयः । परमाणुद्व्यणुकयोरपि महत्वापत्त्या प्रत्यक्षत्वापत्तेः । न चोद्भूतरूपस्पर्शान्यतराभावादप्रत्यक्षत्वम् ।

त्र्यणुकादेः प्रत्यक्षत्वेन तत्रोद्भूतरूपादिसत्वस्याङ्गीकर्तव्यत्वेन तत्कारणे तदभावे तदनुत्पादायोगात् उद्भूतरूपादेः परमाण्वादावपि सिद्धेः निष्प्रत्यूहत्वात् । अन्यथा त्र्यणुकादेरप्रत्यक्षत्वापत्तिः । न तृतीयः। ह्रस्वत्वस्य महत्वाभावाविनाभूतत्वेनाप्रत्यक्षत्वप्रयोजकत्वात् सर्वकार्याप्रत्यक्षत्वापातात् । न चतुर्थः । दीर्घत्वस्य महत्वाविनाभूतत्वेन परमाणुद्व्यणुकयोः प्रत्यक्षत्वापत्तेः।

तन्निरासः

इति चेन्न । पक्षचतुष्टयेऽपि दोषाभावात् । न च विरोधः अणुत्वमहत्वादीनां समानाधिकरणत्वेन विरोधाभावात्। त्र्यणुकादिषु महात्वादेरेकजातीयस्य उत्कर्षापकर्षयोरिव सर्वद्रव्येषु परिमाण स्यैवैकजातीयत्वेनोत्कर्षापकर्षयोरङ्गीकार्यत्वेन वस्तुव्यपेक्षया अणुत्वमहत्वादीनामेकत्र सम्भवात् । अत एव न प्रत्यक्षत्वा प्रत्यक्षत्वयोर्विरोधापत्तिः पुरुषभेदेनोभयव्यवस्थितेः। इन्द्रियपाटवा पाटवयोरेव प्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकत्वं न तु केवलमहत्वादेः । अन्यथा मन्दविलोचनस्य त्र्यणुकप्रत्यक्षत्वापत्तिः । उद्भूतरूपवत्त्व समानाधिकरणपद्विन्द्रियसन्निकर्षस्यैव प्रत्यक्षत्वप्रयोजकत्वात् न गगनादिप्रत्यक्षतापत्तिः । एतेन त्र्यणुकानुपलम्भः गुणविशेष विपर्ययाधीनः आलोकेन्द्रियसन्निकृष्टचाक्षुषद्रव्यानुपलम्भत्वात् पवनानुपलम्भवदित्युक्तं निरस्तम् । अपकृष्टमहत्वादिनान्यथा सिद्धत्वात् । न च तथा सति पर्वतादेरप्रत्यक्षत्वापत्तिः । अपकर्षविशेषस्य विवक्षितत्वात् । तादृशस्य निश्चेतुमशक्यत्वेन पुरुषापेक्षयैव व्यवस्थाया वक्तव्यत्वात् । न च तरतमभावेन

स्थितपरिमाणवत्सु महत्त्वाणुत्वसम्मेलनेऽपि परमाणौ न महत्वसम्भवः परमाणुपरिमाणादपकृष्टपरिमाणाभावादिति वाच्यम् । परमाणुः स्वपरिमाणापेक्षयाऽपकृष्टपरिमाणकयुक्तः द्रव्यत्वात्तन्तुवदित्यादिना तस्य सिद्धेः । परमाणोर्भागानां तद्भागानां च सत्वेन बाधव्यभिचारानवकाशात् । तस्मान्न सूत्रोक्तानुमानस्य प्रतितर्कपराहतिः ॥

७.बाधसत्प्रतिपक्षनिरासः

न च परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् परिमाणोत्कर्षतारतम्यवदिति अनुमानेन परिमाणापकर्षकाष्ठाश्रयतया परमाणोः सिद्धत्वेन न महत्वमिति वाच्यम् । क्वचिद्विश्रान्तिरूपसाध्यस्य इयत्तावच्छेदरूपत्वे दृष्टान्ते साध्यवैकल्यात् । परिमाणोत्कर्षतारतम्ये अनन्तत्वस्यैव दृश्यमानत्वात् । तस्येयत्तापरिच्छेदे ईश्वरस्य परममहत्वानुपपत्तेः । क्वचिद्विश्रान्तानन्तांशोपेतद्रव्यसहितत्वार्थकत्वे च विरोधात् । केवलं क्वचिदाश्रितत्वे अर्थान्तरता । न च परिमाणापकर्षतारतम्यं क्वचिन्निरतिशयं परिमाणतारतम्यत्वात् परिमाणोत्कर्षतारतम्यवदिति सिषाधयिषितमिति वाच्यम् । अतिशयस्याधिक्यरूपत्वे तदपेक्षया उत्कृष्टपरिमाणसद्भावेन तद्राहित्याभावाद्बाधात् । न्यूनत्वे दृष्टान्ते साध्यवैकल्यात् । साधारणातिशयाभावात् । त्र्यणुकावयवपरिमाणे उत्कर्षापकर्षावधिमत्वाभावः विवक्षित इति तु हेत्वभावान्न सम्भवति। परिमाणत्वस्य घटादिपरिमाणे व्यभिचारात् नित्यपरिमाणत्वस्यासिद्धेः । परिमाणकाष्ठावत्वस्य साध्यावैशिष्ट्यात् । एतेन अणुत्वत्वं सजातीयप्रतियोगिकोत्कर्षापकर्षानाश्रयवृत्ति

परिमाणत्वव्याप्यजातित्वात् महत्वत्ववत् । अणुत्वत्वं स्वसमानजातीयनिरूपितापकर्षासमानाधिकरणस्वसमानजातीयनिरूपितोत्कर्ष समानाधिकरणं परिमाणत्वसाक्षाद्व्याप्यजातित्वात् महत्वत्ववदित्यादि **किरणावलीप्रकाशलीलावतीप्रकाशाभिप्रेतमनुमानं** निरस्तम् । परिमाणत्वावान्तरजातेरभावस्य प्रागुपवर्णितत्वेन पूर्वोक्त दोषानिस्तारात् ।

८. कालाकाशयोः परिमाणोत्कर्षापकर्षयोरानन्त्यस्य साक्षिप्रमाणेन समर्थनम्

परिमाणोत्कर्षतारतम्यस्यानन्तत्वं च कालाकाशयोः साक्षिसिद्धम्। कालाकाशयोः साक्षिसिद्धत्वे तद्धर्मयोः परिमाणोत्कर्षापकर्ष तारतम्यानन्त्ययोरपि साक्षिवेद्यत्वात् । न चोभयं व्याहतम् । साक्षिप्रमिते व्याहतिशङ्कानुदयात् । न च सम्प्रतिपन्नः सर्वो देशः कालः परिच्छिन्नः स्वतः स्थूलेन कालान्तरेण देशान्तरेण वा युक्तः कालत्वात् देशत्वात् मुहूर्तहस्तादिकालदेशवदित्यनुमानात् देशकालयोः परिमाणोत्कर्षानन्त्यसिद्धिरिति वाच्यम् । परिमाणोत्कर्षतारतम्यमियत्तावत् परिमाणतारतम्यत्वात् अपकर्षतारतम्यवदित्यनुमानविरोधात् । पररीत्या प्रवृत्तत्वान्न सिद्धान्तविरोधः । आगमस्यात्रार्थे साक्षसिद्धेऽनुवादकत्वात् अनन्तत्वबोधकस्यागमस्योभयानन्त्ये पर्यवसानस्य न्याय्यत्वाच्च । तस्मात्साक्षिसिद्धत्वमेव देशकालपरिमाणोत्कर्षापकर्षतारतम्यानन्त्यस्येति सिद्धम् । कालादौ परिमाणोत्कर्षानन्त्यस्य विपरीतप्रमाणाभावात्सत्यत्वमिव अपकर्षानन्त्यस्यापि तत एव सत्यत्वम् । न चापकर्षस्याल्पत्वरूपतया

अनन्तत्वस्यानल्पत्वरूपतया विरुद्धयोः कथं विशेषणविशेष्यभाव इति वाच्यम् । अनन्तत्वस्य परिच्छेदाभावरूपत्वेनानल्पत्वरूपत्वाभावात् । अन्यथा उत्कर्षस्यापि अनल्पत्वरूपत्वेन पदार्थतावच्छेदकाभेदेन विशेष्यविशेषणभावानुपपत्तिः । यथा बहुत्वाल्पत्वसंख्ययोरनन्तत्वं विशेषणं अवच्छेदराहित्यरूपं तथात्रापि वक्तव्यम् । एतच्च गणितशास्त्रे प्रसिद्धम् ॥

९. बहुलंतणि वाक्यार्थः

अत्र ''न महत्तत्वगुणत '' इति आचार्यैः कथमुक्तम् । समानाधिकरणे उत्तरपदे जातीये च परे महतः आकारः अन्तादेशः स्यादित्यर्थकेन ''आन्महतः समानाधिकरणजातीययो'' रित्यनेन महातत्वेति प्रयोक्तव्यत्वात् । मैवम् । महत्तत्वमिति द्रव्यविशेषस्य संज्ञात्वात् । संज्ञाविषये छन्दोविषये च यथा प्रयोगो दृश्यते तथैव साधुत्वस्य वाच्यत्वात् । तदुक्तं भाष्ये 'बहुलं तणीति' तणि संज्ञाविषये छन्दोविषये च व्याकरणविधिः बहुलं भवतीत्यर्थः ॥

१०. ईश्वरपरिमाणानन्त्यस्यागमसिद्धत्वम्

ईश्वरेऽपि परिमाणापकर्षोत्कर्षानन्त्यं चागमसिद्धम् । ''अणोरणीयान् महतो महीयानिति'' श्रुतेः जागरूकत्वात् । निर्विशेषणाणुमहच्छब्दाभ्यां ईश्वरगतपरिमाणापकर्षोत्कर्षयोरनवधिकत्वस्योक्तत्वात् । अणोर्महतश्चेत्यस्यापि ईश्वरविषयत्वात् स्वस्यापि स्वापकर्षोत्कर्षयोः श्रुतिसिद्धयोर्विशेषबलेनाङ्गीकारात् । ''सत्यं ज्ञानमनन्तं ब्रह्मे'' ति श्रुतिरपि ईश्वरे परिमाणोत्कर्षापकर्षानन्त्यं

प्रतिपादयति । देशकालानन्त्येषु देशानन्त्यस्य निरवधिकपरिमाणवत्त्वरूपत्वेनापकर्षोत्कर्षयोः परिमाणगतयोरानन्त्यस्य सिद्धेः। युगपत्प्रवृत्तेऽर्थद्वयकल्पनानवकाशात् न गौरवं एकार्थत्वमेवास्त्विति शङ्कापि न। न चैवमल्पगुणकालवत्वमपि स्यादीश्वर इति वाच्यम्। इष्टापत्तेः। अल्पमात्रगुणकालवत्वानङ्गीकारात्। अल्पगुणकालाभावे अनन्तगुणकालवत्वायोगात् । तथा अल्पस्थानानवस्थितस्य सर्वावस्थानस्याप्यसम्भव एव । समुदायव्यापकत्वस्यैकदेशव्यापकत्व नियतत्वात् । एकदेशाव्यापकत्वस्य समुदायाव्यपकत्वे नियन्त्रितत्वाच्च एकदेशाव्यापकत्वे सर्वदेशाव्यापकत्वेन शशविषाणवत्सत्वाभावप्रसङ्गाच्च।

तत्र तत्र स्थितस्य तत्तत्परिमाणवत्वनियमेनोत्कर्षापकर्षवत्परिमाणसिद्धेः । घटादीनां स्वांशात्यन्ताभेदाभावात् गगनादीनां स्वांशाभेदात् न घटादेः तत्तत्परिमाणवत्वप्रसङ्गः । न च परमाणुतोऽप्यपकृष्टपरिमाणाश्रयद्रव्यस्याभाव इति वाच्यम्। परमाणुभागानां सत्वात्। न च तेषु विश्रान्तिः। तेषामपि भागसत्वात्। अविश्रान्तभागपरम्परायाः साक्षिसिद्धत्वान्नाप्रामाणिकत्वम्॥

११. परमाणोःसाक्षिसिद्धत्वम्

न च साक्षिणोऽप्रमाणत्वम्। आकाशादेः सुखादिकस्याग्रहणप्रसङ्गात्। ज्ञानप्रामाण्य स्यानुमानवेद्यत्वेऽनवस्थाद्यापत्त्या साक्षिणैव ग्राह्यत्वात्। अक्षजादेर्मानत्वं सप्रमाणकं वस्तुत्वात् घटवदित्यनेन सिद्धस्य साक्षिणः स्वप्रकाशत्वान्नानवस्था । परमाण्वादेश्च बहिरस्वातन्त्र्यान्न मानसं

प्रत्यक्षम् । नाप्यागमेन परमाण्ववगमे तेन संकेतग्रहसिद्धिः तत्सिद्धौ चावगतसमयात् तदवगम इति अन्योन्याश्रयात् । अनुमानं च न परमाणुपक्षकं आश्रयासिद्धेः। नापि द्व्यणुकपक्षकं तस्याप्यसिद्धेः । न च अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदित्यनुमानेन परमाणुसिद्धिः । अणुपरिमाण शब्देन परिमाणापकर्षविवक्षायां क्वचिद्विश्रान्तत्वस्य विकल्पानुपपत्त्या दूषितत्वात् परमाणुद्व्यणुकपरिमाणासिद्धेश्च । न च जालसूर्य मरीचिस्थस्य सूक्ष्मस्य दृश्यमानस्य रजसः त्र्यणुकाभिधानस्य चाक्षुषद्रव्यत्वेन सिद्धमहत्वकस्य क्रियावत्वसहितमहत्वसिद्ध कार्यत्वकस्य कार्यत्वेन हेतुना सावयवत्वे सिद्धे तादृशावयवस्य द्व्यणुकत्वं महद्द्रव्यारम्भकत्वहेतुना सावयवत्वसिद्धौ तादृशावयवस्य सावयवत्वकल्पनायां प्रमाणाभावात् बाधकसत्वाच्च निरवयवस्य परमाणुत्वं च सिद्ध्यतीति वाच्यम् । प्रत्यक्षस्य तस्यैव परमाणुत्वं न तदवयवस्येति वक्तुं शक्यत्वात् । न च महत्वात्कथमस्य परमाणुत्वमिति वाच्यम् । महत्वस्यैवासिद्धेः। सिद्धत्वेऽपि अणुत्वसमावेशेऽपि विरोधाभावात् । अकार्यस्यापि महत आत्मनः प्रत्यक्षत्ववत् महतोऽपि तस्य चाक्षुषत्वोपपत्तेः कार्यत्वस्याप्रयोजकत्वात् । न च महत्वकारणीभूतकारणबहुत्वेन कार्यत्वसिद्धिः। महत्वस्य नित्यत्वात् । चाक्षुषत्वं चाप्रयोजकम् । तस्मान्न कार्यत्वम् । सावयवत्वेऽपि तेषामेवावयवानां परमाणुत्वमस्तु । न च महद्द्रव्यारम्भकत्वेन सावयव त्वसिद्धिः । निरवयवस्यापि महद्द्रव्यारम्भकत्वे बाधकाभावात् । बहुत्वेनैव महत्वारम्भोपपत्तेः । सावयवत्वे सिद्धेऽपि पुनस्तेषां

सावयवत्वं कुतो न सिद्ध्येत । न चानवस्था बाधिका । तदवयवानां तदवयवानां वा निरवयवत्वेन तद्विश्रान्तेः । सावयवस्यैव नित्यत्वोपपत्तेः नादिकार्यानुपपत्तिः । एवमेवाकाशपरिमाणोत्कर्ष धर्मादिसिद्धिरपि नानुमानादिनेति बोद्धव्यम् । तस्मात् प्रामाणिकस्य परमाणोः अनुमानावेद्यत्वात् अगत्या साक्षिवेद्यत्वमङ्गीकर्तव्यम् । तथा च तस्य पदार्थत्वहेतुना सभागत्वं सिद्ध्यति । संयोगित्वेनापि सावयवत्वसिद्धिः । पृथिवीजलपरमाणुसंयोगानन्तरजात सजातीय परमाण्वन्तरसंयोगे सति परमाणुद्वयसंयोगजद्व्यणुकेन विजातीयेन विजातीयपरमाणुसंयोगो यत्र तत्रानेकसंयोगस्य परमाणोः सिद्धत्वात्, पाषाणमध्यवर्तिपरमाणोः परितोऽवस्थितानेकपरमाणुसंयोगाभावे पाषाणावस्थानानुपपत्तेः । अनेकैः संदोगस्य सिद्धत्वाच्च तेन च प्रदेशवृत्तित्वसिद्धेः। तस्मात् सावयवत्वं परमाणूनां साक्षिसिद्धत्वं च ॥

१२. परिमाणानन्त्ये अवयवपरम्पराविश्रान्त्यभावे च बाधकोद्धारः

न चावयवपरम्पराविश्रान्त्यभावे अनन्त अवयवारब्धत्वाविशेषात् सर्षपमहीधरयोः परिमाणाविशेषः स्यात् । अवयवानन्त्यसाम्ये परिमाणप्रचयविशेषस्याप्यसम्भवेन तन्मूलकपरिमाणविशेषा सिद्धेरिति वाच्यम् । अविश्रान्तावयवपरम्परात्वस्य अनन्तावयवा रब्धत्वेन व्याप्त्यसिद्धेः । एवं तस्यापि समपरिमाणत्वेनापि । न च सर्षपावयवपरम्पराया निरवधिकत्वे मूर्तानां समानदेशत्वानुपपत्तौ सर्षपावयवैर्जगति व्याप्तेर्विश्वव्यापी सर्षपः स्यादिति वाच्यम् । पार्थिवपरमाणूनामनन्तत्वेपि मूतान्तरावकाशदर्शनात् । आनन्त्येऽपि तारतम्यात् । सम्भूतावयवानामपि समसंख्यत्वाभावेन परिमाण

भेदाभावापत्तेरनवकाशाच्च । न च परमाणोः सावयवत्वे शब्दत एव व्याघात इति वाच्यम् । अविभागस्यैव परमाणुपदप्रवृत्तिनिमित्तत्वात् । अविभागश्च विभागायोग्यविभिन्नावयवयुक्तत्वम् । परमाणोः अवयवानामतिसूक्ष्मतया विभागायोग्यत्वात् भिन्नत्वाच्च लक्षणसङ्गतिः । गगनावयवानां विभागायोग्यत्वेनातिव्याप्तिरतः विभिन्नेति । द्व्यणुकादावतिव्याप्तिवारणाय विभागायोग्येति । अथ वा स्वावयवभिन्नावयवत्वावस्थानापन्नस्वापकृष्टपरिमाणवस्तुकत्वाभाववत्वमेव तल्लक्षणम् । एवं च जनकीभूतावयवपरम्परायाः अविश्रान्तिपक्षे पूर्वपूर्वावयवानुत्पत्तावुत्तरोत्तरावयवानुत्पत्त्या घटादिरूपप्रकृत कार्यस्याप्यनुत्पत्तिरिति मूलक्षयप्रसङ्गेऽपि परमाण्ववयवभूतसूक्ष्मेषु तद्विश्रान्त्यभ्युपगमवादे तदप्रसर एव ॥

१२. द्वयोरेव संयोगः आरम्भकः इति नियमानुपपत्तिः

द्वयोरेव परमाण्वोः संयोगात् कार्यजन्मकल्पनापि न युक्ता प्रमाणाभावात् । अनियतसंख्याकपरमाणुसंयोगादपि कार्योत्पत्तिसम्भवाद्बाधकाभावात् । एवं विजातीयपरमाणुसंयोगादपि कार्योत्पादः सुलभः। अतःद्वयोरेव परमाण्वोः संयोगः कार्येऽसमवायिकारणमिति नियमः न सम्भवति । न चैकेन सगन्धपृथिवीपरमाणुना विजातीय संयुक्तेन कार्ये गन्धानुत्पादात् एकस्यापि तथात्वे सन्ततोत्पत्ति प्रसङ्गाच्च सजातीयद्वयसंयोगकल्पनं ज्याय इति वाच्यम् । कार्यद्रव्योत्पत्तेरपेक्षितत्वात् । वस्तुतस्तु विजातीयारम्भकयुक्तत्वेऽपि वैशेष्याद्व्यवस्थायाः युक्तत्वात् । न चारम्भकसंख्यापकर्षतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वात् परिमाणतारतम्यवदित्यादिना क्वचिद्विश्रा

Scanned with CamScanner

न्तिसिद्धौ एकस्यारम्भकत्वे सन्ततोत्पत्त्यादिप्रसङ्गात् त्र्यादिकल्पने गौरवात् द्वयोरेव परमाण्वोः संयोगो द्रव्यारम्भक इति वाच्यम् । दृष्टान्ते साध्यवैकल्यस्य समर्थितत्वात् । अनेनैव न्यायेन द्व्यणुकद्वय संयोगस्यैवारम्भकत्वं स्यात्। तस्मन्नियमोऽप्रामाणिक एव ॥

१४. समवायिकारणादिखण्डनम्

समवायस्याप्रामाणिकत्वात् समवाय्यसमवायिकारणलक्षण मयुक्तम् । असमवायिकारणलक्षणस्य समवायिकारणे निमित्ते चातिव्याप्तेः । तथा हि तन्तुपटद्वित्वस्थले पटे, शरीरात्मद्वित्वस्थले अपेक्षाबुद्धौ, व्याप्यबुद्धौ सुखदुःखकारणधर्माधर्मयोरतिव्याप्तिश्च । तत्तल्लक्षणे तत्तद्भिन्नत्वं विशेषणं दीयते इति चेत् तत्कुतः ? आचार्यसंकेतानुसारादिति चेत् तथा च प्रकिया निर्मूलेति सिद्धमेव । तस्मात्सृष्टिप्रक्रिया अप्रामाणिकी वैशेषिकाणामिति सिद्धम् ॥

|| ॐ || **समवायाभ्युपगमाच्च साम्यादनवस्थितेः** || ॐ ||

१५. इहेति प्रत्ययस्य सम्बन्धपूर्वकत्वनिरासः

इहेदमिति यतः कार्यकारणयोःस समवाय इति काणादं सूत्रम् । कार्यकारणयोः अयुतसिद्धयोः इहेति प्रत्ययहेतुः सम्बन्धः स समवाय इति सूत्रार्थः । गुणगुणिनोरवयवावयविनोः विशेषनित्यद्रव्ययोः क्रियाक्रियावतोः समवायः सम्बन्धः। तथा चेहेति प्रत्ययः सम्बन्धपूर्वकः इहेति प्रत्ययत्वादित्यनुमानेन सिद्दस्य सम्बन्धस्य संयोगादिरूपत्वासम्भवात् समवायरूपत्वसिद्धिरिति वैशेषिकैरुच्यते । तदसत् । इह तन्तुपटयोः समवायः इति प्रत्यये व्यभिचारात् । न च

समवायस्य सिद्धत्वात् न व्यभिचारकथनसम्भव इति वाच्यम्। आपाततः प्रतीते सम्बन्धे व्यभिचारं दृष्ट्वा परावृत्तेरावश्यकत्वस्य विवक्षितत्वात्। न च प्रत्यये विशेषणज्ञानस्य कारणत्वात् तादृशप्रत्ययस्य तत्कारणकत्वमस्त्येवेति वाच्यम्। आधाराधेयभावापन्ननिरूपकसम्बन्धपूर्वकत्वस्यैव साध्यत्वात्। अन्यसम्बन्धस्यैव सिद्धेरापादनात्। अन्यथा स्थाणुश्येनयोः संयोग इत्यत्र समवायो न सिद्ध्येत्। इन्द्रियार्थसन्निकर्षादिना सिद्धसाधनत्वापत्तेश्च। व्यभिचार परिहाराय समवायान्तराङ्गीकारे त्वनवस्था। समवायस्य प्रत्यक्षत्वमते सम्बन्धप्रतीतिपूर्वकत्वस्य साध्यत्वात् ज्ञप्तिप्रतिबन्धकत्वमनवस्थायाः स्पष्टम्। अप्रत्यक्षत्वमते इहेति प्रत्ययस्य सत्तया सम्बन्धपूर्वकत्वेन तादृशसम्बन्धानङ्गीकारात् अपसिद्धान्तः। न चारोपितसम्बन्ध पूर्वकत्वम् प्रतीत्यनवस्थानापरिहारात्। तन्तुपटादावपि तथात्वापाताच्च। न च स्वनिर्वाहकत्वं समवायस्येति वाच्यम्। तथा सति द्रव्यगुणादीनामिहेति प्रत्ययोऽपि स्वातिरिक्तसम्बन्धानधीनत्वापातेन द्रव्यस्यैव स्वनिर्वाहकत्वापत्तेः। संयोगस्यापि स्वनिर्वाहकत्वापत्तेश्च। कल्पनालाघवाच्च। तस्मादिहेति प्रत्ययस्य सम्बन्धपूर्वकत्वाभावात् न पटे तन्तव इति प्रत्ययस्य सम्बन्धविषयकत्वसिद्धिः॥

१६. गुणगुण्यत्यन्तभेदनिरासः

गुणगुण्यादीनामत्यन्तभेदाभावाच्च न समवायसिद्धिः। गवाश्वादिवदनुपलम्भात् न प्रत्यक्षं गुणगुणिभेदे। गुणगुणिनावत्यन्तभिन्नौ अपर्यायशब्दवाच्यत्वात् घटपटवदित्यनुमानस्य समवायतद्गत धर्मयोर्व्यभिचारः। भेदेऽनवस्थानात्। एवमभेदोऽपि। व्यपदेशभेदादिकं

स्वभावविशेषादित्युच्येत तर्हि गुणगुणिनोरभेदेऽपि स्वभावविशेषादेव तदुपपद्येत । न चाभेदपक्षे अपर्यायशब्दवाच्यत्वादि निर्वाहाय स्वनिर्वाहकविशेषाङ्गीकारवत् भेदपक्षेऽपि अनवस्थापरि हारकः स्वनिर्वाहकसमवायस्वीकारः साधुरिति वाच्यम् । गुण्यतिरिक्त गुणस्य उभयातिरिक्तसम्बन्धस्य तस्य स्वनिर्वाहकत्वस्य कल्पनापेक्षया विशेषस्य स्वनिर्वाहकस्य कल्पनस्य लघुत्वात् । ज्ञेयत्वादीनां धर्माणां सप्तपदार्थवृत्तीनां अतिरिक्तत्वे सप्तपदार्थनियमभङ्गादनतिरिक्तत्वपक्षे स्वनिर्वाहकविशेषाङ्गीकारापत्तिः । तस्माद्गुणगुण्यत्यन्तभेदःन स्वीकर्तव्य इति ॥

१७. समवाये प्रत्यक्षनिरासः

किञ्च समवाये न प्रत्यक्षं प्रमाणम् । कुण्डदध्नोः संयोग इतिवत् तन्तुपटयोः समवाय इत्यप्रतीतेः । अयं तन्तुपटसम्बन्धप्रत्ययः चाक्षुषः अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् पटप्रत्ययवत् । अयं तन्तुपटयोः सम्बन्धः योगजधर्माजन्यजन्यसाक्षात्कारविषयः तन्तुपट सम्बन्धत्वात् एतत्तन्तुपटान्तरसंयोगवत् इति आभ्यां समवायप्रत्यक्षतासाधनमपि न सत् । तन्तुपटसम्बन्धतत्प्रत्यययो रसिद्ध्या आश्रयासिद्धेः । सम्बन्धाप्रतीतौ शुक्लः पट इति सामानाधि करण्यप्रतीतिर्न स्यात् तस्य तत्पूर्वकत्वदर्शनादिति चेन्न । समवायोऽस्तीत्यादौ व्यभिचारात् । सत्त्वस्य समवायेनातिरिक्तसम्बन्ध स्याप्रतीतावपि समवायोऽस्तीति सामानाधिकरण्यव्यवहारदर्शनात् । तस्मान्न समवाये प्रत्यक्षम् प्रमाणम् ॥

Scanned with CamScanner

१८. समवाये अनुमाननिरासः

नाप्यनुमानं प्रमाणम् । इहेति प्रत्ययत्वस्य पूर्वं दूषितत्वात् । इह भूतले घटाभाव इत्यादौ व्यभिचारश्च । भावमात्रविषयकत्वविशेषणे तु इह घटे ज्ञानमित्यादौ व्यभिचारः । नापि जात्यादिगोचरविशिष्ट व्यवहारः सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टप्रत्ययत्वात् सघटं भूतलमिति व्यवहारवदिति । ज्ञातोघटोऽस्ति समवाय इत्यादौ व्यभिचारात् । अयं पटः एतत्तन्तुसम्बद्धः एतदाश्रितत्वात् एतदाश्रित तृणादिवदित्यस्यापि इह समवायेऽस्तित्वमित्यादौ व्यभिचारात् । भूतलरूपादयः भूतलसम्बद्धाः भूतलविशेषणत्वात् घटवदित्यत्र भूतल विशेषणज्ञाने व्यभिचारः । इह तन्तुषु पट इत्यादिप्रत्ययः एतज्जनकसंयोगत्वरहितसम्बन्धजन्यः इहेति प्रत्ययत्वात् इह कुण्डे बदरमिति प्रत्ययवत् इत्यस्य अयं पटः एतज्जनकतन्तुत्व रहितोपादानजन्यः पटत्वात् पटान्तरवदित्याभाससाम्यम् । रूपादयः सम्बन्धवन्तः प्रमेयत्वाद्धटवदित्यस्य समवायाभावयोर्व्यभिचारः । इदं चक्षुः एतज्जन्यसंयोगज्ञानत्वरहितसम्बन्धज्ञानजनकं चक्षुष्ट्वात् अन्य चक्षुर्वत् । अहं मन्निष्ठसंयोगज्ञानत्वरहितसम्बन्धज्ञानवान् आत्मत्वात् आत्मान्तरवत् । अयं कालः इदानीन्तनसंयोगज्ञानत्वरहितसम्बन्ध ज्ञानवान् कालत्वादन्यकालवत् इत्यादीनां इदं चक्षुः एतज्जन्यसंयोग समवायज्ञानत्वरहितसम्बन्धज्ञानजनकं चक्षुष्ट्वात् अन्यचक्षुर्वत् इत्यादि आभाससाम्यम् । विशेष्यविशेषणभावसम्बन्धसिद्ध्याऽर्थान्तरता । संयोगत्वं सम्बन्धव्यावृत्तं जातित्वात् गोत्ववदित्यस्य जातेः प्रतिव्यक्ति नियतत्वेन सिद्धसाधनत्वम् । एवमेव नवीनानामनुमानान्यपि निरस्यानि ॥

१९. अवयवावयव्यभेदविशेषस्य अर्थापत्तिप्रत्यक्षसिद्धत्वं अयावद्रव्यभाविस्थले भेदाभेदसमर्थनम्

गुणावयवगुण्यवयव्यभेदे प्रत्यक्षं तावत्प्रमाणम्। तन्तुपटादि विषयकप्रत्यक्षस्य घटपटादिप्रत्यक्षतः वैलक्षण्यानङ्गीकारे अनुभवविरोधेन घटासत्त्वकालीनपटसत्त्वविषयकप्रत्यक्षवत् तन्त्व सत्त्वकालिन पटसत्त्वग्राहिप्रत्यक्षापत्त्या वैलक्षण्यमवश्यं स्वीकार्यम् । न च सम्बन्धविषयकत्वेन वैलक्षण्यम् । कुण्डबदरादिप्रतीतितोऽवैलक्षण्यापत्तेस्तावता तादवस्थ्यात् । युतायुतसिद्धविषयकत्वं चानुपयुक्तम् । युतायुतसिद्धत्वेऽपि निमित्तगवेषणात् । अतः अभेदविषयकत्वेनैव वैलक्षण्यं वाच्यम् । ततश्च तन्तुपटप्रत्यक्षस्याभेदविषयकत्वं सिद्धम् । पटः तन्त्वभिन्नः मूर्तत्वे सति समानदेशत्वात् तन्तुवत् । पटः तन्त्वभिन्नः तद्रूपरसादिभिन्नरूपरसादिशून्यत्वात् तन्तुवत्। न चावयविरूपादिभिः अवयवरूपादेर्नाशात् अवयवावयविनोर्भेदेऽपि रूपरसादिद्वैतानुपलम्भात् अप्रयोजकत्वमिति वाच्यम्। तथा सति असमवायिकारणनाशेन कार्यनाशध्रौव्यात् अवयविन्यपि रूपाद्यनुपलब्धिप्रसक्त्या तदनवकाशात् । न चाभेदश्चेत् सामानाधिकरण्यानुपपत्तिरिति वाच्यम् । विशेषेण सामानाधिकरण्यव्यवहारनिर्वाहात्। गुणादिकं विनानुपलभ्यमानत्वादिधर्मनिर्वाहाय अनवस्थापरिहाराय च भेदपक्षे, विरोधपरिहाराय भेदाभेदपक्षे, विशेषस्यावश्यमङ्गीकार्यत्वेन तेनैवाभेदपक्षे सामानाधिकरण्योपपत्तेः । शुक्लः पटः , घटः पटो नेत्यादिसकलविधिनिषेधव्यवहारनिर्वाहान्यथानुपपत्त्या विशेषस्योररीकर्तव्यत्वाच्च।

तस्मात् सामानाधिकरण्यप्रतीतेः नीलो घट इत्यादौ विशेषविषयकत्वं अभेदविषयकत्वं च स्वीकर्तव्यम्। नचानवस्थायाः अदोषत्वम् । गुणादीनां गुणवत्त्वस्यानवस्थाभयादेव त्यक्तत्वात् । अन्यथाऽनवस्थायाः क्वापि दोषत्वाभावापत्तेः। अयावद्द्रव्यभाविस्थले भेदाभेदः । तत्र अनष्टेऽपि गुणे गुण्यविनाशदर्शनात् विरुद्धधर्मवत्वेन भेदस्य स्वीकरणीयत्वात् । विशेषस्य भेदकार्यव्यवहारनिर्वाहकत्वेन विनाशं प्रत्यनिर्वाहकत्वात् भेदेनैव तत्र निर्वाहः कार्यः। न च विशेषस्य सकलभेदकार्यकारित्वम् । तथा सति भेदत्वमेव तस्य स्यात् । अवयवावयव्यभेदग्राहकस्य सत्यपि तस्मिन्नसत्त्वादित्यादिहेतु जनितप्रमाणस्योभयविधस्य भेदाभेदाङ्गीकारस्यायावद्द्रव्यभाविस्थले आवश्यकत्वात् । तस्मात् प्रत्यक्षार्थापत्त्यादिनावश्याङ्गीकार्यविशेषेण अवयवगुणादितो धर्मिणः अभेदः अयावद्द्रव्यभाविस्थले भेदाभेदाविति सिद्धम्॥

२०. संयोगस्य अंशवृत्तित्वे बाधकपरिहारः

एतेनांशतः संयोग इति नोपपद्यते। अंशपरम्पराया अविश्रमेन अंशांशादिसंयोगस्य कारणस्य वक्तव्यस्यानवस्थितत्वात् । घटांश संयोगस्य घटवृत्तित्वे अतिप्रसंगाच्च। घटसंयोगः घटवृत्तिः तद्गुणत्वात् तद्रूपवत् । घटांशवृत्तिः संयोगः न घटसंयोगः तदन्यवृत्तित्वात् परसंयोगवदित्यनुमानविरोधादिति निरस्तम् । अंशांशिनोरभेदात् । अत एव आद्यानुमानस्य सिद्धसाधनता। अंशावृत्तित्वे सति घटवृत्तित्व साधने च दृष्टान्ते साध्यवैकल्यम्। द्वितीये स्वरूपासिद्धत्वम्। अंशांशिनो रभेदेनानवस्थाया अभावात्। पूर्वपूर्वसंयोगस्य कारणत्वाभावाच्च। अत

एव संयोगस्य अन्यतरकर्मजोभयकर्मजसंयोगजभेदेन त्रैविध्य मित्यपास्तम् । विरुद्धादिक्रिययोः सन्निपातस्य मल्लयोः संयोगस्यैक त्वाभावात् । हस्ततरुसंयोगातिरिक्तकायतरुसंयोगाभावात् संयोगज संयोगोऽपि नास्ति । अंशे संयोगस्य प्रमाणप्रमितत्वेनानवस्थाप्रसङ्गस्य वक्तुमशक्यत्वाच्च । न च घटसंयोगस्याव्याप्यवृत्तित्वात् (स्वाभावसमा नाधिकरणत्वात्) अंशवृत्तित्वेन प्रतीतिमात्रमिति वाच्यम् । अंश वृत्तित्वेनाविरोधे अंशिवृत्तित्वकल्पनाया अयोगात् । तस्मादंशांशि अभेदाङ्गीकार एव ज्यायान् । कार्ये परिमाणोत्कर्षस्य प्रचयजन्यत्वस्य द्वितूलके दर्शनात् प्रशिथिलसंयोगरूपप्रचयस्य किंचिदंशवृत्तित्वा वृत्तित्वसत्त्वे एव उपपन्नत्वेन संयोगस्यांशवृत्तित्वं सिद्ध्यत्येव । तथा च परमाणौ संयोगस्यांशवृत्तित्वाभावे तत्कार्यद्व्यणुकपरिमाणस्योत्कृष्ट त्वाभावापातः । न चेष्टापत्तिः । अणुः परमाणुरिति व्यवहारविरोधात् । संख्यातः परिमाणजन्मेति तु पूर्वमेव निरस्तम् । अतः अनवस्थापादक तर्कस्य प्रतितर्कपराहतिरुक्ता । तथा च छलत्वात् विपर्यया पर्यवसानात् प्रतितर्कपराहतत्वात् अंशसंयोगस्यानभ्युपगमतर्कस्य न संयोगादेरव्याप्यवृत्तित्वम् । तथा संयोगविभागभेदविशेषकल्पना पराकार्या युक्ता ॥

२१. संयोगादीनामयुगधर्मत्वसमर्थनम्

यावदंशभाविनोंऽशिनः स्वांशैरत्यन्ताभेदः पटादेरंशिनोऽपि सर्वांशैरत्यन्ताभेदः । एकैकांशेन तु भेदाभेदः । न च सर्वतन्तुभावेऽपि पटस्यादर्शनात् भेदाभेद एव स्वीकार्य इति वाच्यम् । तिर्यगूर्ध्वरूपेण संश्लेषव्यतिषङ्गानन्तरजायमानविशिष्टाकारस्य पटेनात्यन्ताभेदात् । न

च पटस्य तन्त्वनाश्रितत्वं विशिष्टाकारस्य विशेष्याश्रितत्वमिति वैरूप्यम्। विशेषबलात्तदुपपत्तेः। एतस्य सर्वस्य प्रत्यक्षप्रमाणप्रमित त्वात् स्वीकार्यत्वम्। न च गुणादीनां गुण्याद्यभेदो न घटते। संयोगादि गुणस्य द्विनिष्ठत्वेन आधारयोर्घटपटयोरभेदापत्तेरिति वाच्यम्। घटप्रतियोगिसंयोगस्य पटमात्रवृत्तित्वेन घटवृत्तित्वाभावात् संयोगस्याद्विष्ठत्वात्। शुक्ला इमे पटा इत्यादौ शुक्लत्वादिबहुत्वस्येव इमे भिन्ना इमौ संयुक्तावित्यादावपि संयोगभेदादीनां बहुत्वस्यैव प्रतीतेः। न चानयोर्भेद इत्यादिवाक्यप्रतीतं पृथक्त्वादिकं एकं एकवचनान्त तयोक्तत्वात् घटोस्तीति वाक्यप्रतीतघटवदिति अनुमानेनायुग धर्मत्वसिद्धिरिति वाच्यम्। विप्राणां भोजनमित्यत्र व्यभिचारात्। न चायावद्द्रव्यभावित्वेनोक्ताक्षेपपरिहारसम्भवः वस्तुस्थितिकथना र्थत्वात्। नित्यसंयोगपक्षे एतत्परिहारासम्भवाच्च। न च नित्यसंयोग एव नास्ति आकाशपरमाणुसंयोगाङ्गीकारात्। स्वाभाविकांशानभ्युप गमेनौपाधिकस्य निराकरिष्यमाणत्वेन प्रागसंयोगप्रसङ्गेन परमाणु कर्मजत्वासम्भवात्। आकाशमीश्वरसंयुक्तं द्रव्यत्वात् घटवदिति अनुमानस्य प्रामाण्याच्च। न च परिच्छिन्नपरिमाणवत्त्वमुपाधिः। परिच्छिन्तेत्यस्य व्यर्थत्वात्। आकाशमीश्वरसंयोगरहितं अमूर्तत्वादिति तु अप्रयोजकत्वोपाधिग्रस्तम्। तस्मात्संयोगादीनाम युगधर्मत्वमेव॥

२२. सामान्यस्याननुगतत्व समर्थनम्

प्रत्येकं प्रत्येकं अननुगततया रूपादिवत् तत्तद्धर्मतया प्रत्यक्षमेव सामान्यस्यानेकवृत्तित्वाभावे प्रमाणम्। नरत्वादिकं नानुगतं

एकैकप्रतीतौ प्रतीयमानत्वात् व्यतिरेकेण द्वित्ववत् । नरत्वादिकं नानुगतं धर्मत्वात् रूपवत् इत्याद्यनुमानमपि प्रमाणम् । न च द्वित्वे व्यभिचार इति वाच्यम् । तदन्यत्वेन हेतुविशेषणात् । न च धर्मस्य धर्मिणासहाभेदादनेकाश्रितत्वे आश्रयाभेदापत्तिरिति वाच्यम् । भिन्नाभिन्नत्वाभ्युपगमात् । अत्यन्ताभेदस्थले एव यत् यदभिन्नाभिन्न मिति न्यायप्रसरात् । न च सादृश्ये व्यभिचारः तस्याप्यननुगतत्वात् । एकैकप्रतीतावप्रतीतत्वं च प्रतियोगिनिरूप्यत्वेनोपपत्तेः । किञ्च नरत्वानि भिन्नानि विरुद्धमर्माधिकरणत्वात् । अथ वा नष्टानष्टवृत्तिनरत्वे भिन्ने विरुद्धधर्माधिकरणत्वात् सम्मतवत् । विरुद्धौ च धर्मौ नाशानाशौ । न च नरत्वस्य नित्यत्वम् । आश्रयनाशेन तस्यापि नाशावश्यम्भावात् । विमतं विनाशवत् आश्रयसमवेतत्वात् रूपवत् इत्यनुमानेन नाशस्य सिद्धेः । नापि तस्यैकत्वम् प्रमाणाभावात् । श्रुत्यापि भिन्नाश्च भिन्नधर्माश्चेत्यादिकयानेकत्वसिद्धेः । न च रूपादिगुणानां यावद्द्रव्यभावित्वं अग्निसंयोगेन परमाणुषु कर्मोत्पादे तत एव विभागे ततः संयोगनाशे ततः कार्यद्रव्यनाशो भवति । तन्नाशे परमाणुष्वग्निसंयोगात् शामरूपादीनां विनाशः । ततश्चान्याग्निसंयोगे परमाणौ कर्मोत्पत्तौ परस्परसंयोगात् द्व्यणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते । ततश्चावयविनाशानन्तरमपि रूपसद्भावादिति वाच्यम् । परमाणुष्विव कार्यद्रव्येषु पूर्वरूपादिनिवृत्तेरपूर्वरूपाद्युत्प त्तेरुपपत्तेः पीलुपाकवादस्याप्रामाणिकत्वात् । पार्थिवरूपादयः स्वाश्रयविनाशप्रयुक्तनाशवन्तः अवयविरूपादित्वात् दग्धपटरूपवत् इत्यनुमानाच्च । अवयविद्रव्याणां सच्छिद्रत्वेनाग्निसंयोगेऽपि संस्थानाप

गमाभावेनावयविनाशायोगात् । तथा च प्रत्यक्षेण रूपादिनाशस्येव व्यक्तिनाशेन जातिनाशस्य ग्रहात् द्रव्ये सत्येव ताम्रत्वरजतत्वयो र्नाशदर्शनात् ब्राह्मणत्वादिजातिनाशादेरागमेन प्रतिव्यक्तिधर्मभेद स्योक्तश्रुत्या सिद्धत्वात् द्वित्वादिवदेकैकप्रतीयमानत्वाभावाच्च न सामान्यस्यानेकवृत्तित्वम्।

२३. सामान्यस्याननुगतत्वेऽपि सादृश्यस्य व्युत्पत्त्यादिग्राहकत्वम्

ननु सामान्यस्यानेकवृत्तित्वाभावे शक्तिकार्यकारणभावव्याप्य व्यापकभावग्रहानुपपत्तिः स्यात् । प्रतिपिण्डं व्यवहारादेः आनन्त्ये-नाशक्यत्वात् व्युत्पत्त्यसम्भवात् । कार्यकारणभावग्रहस्यान्वयव्यतिरेक प्रमाणकत्वेन व्यावृत्तेषु नियमव्यभिचारयोर्ज्ञातुमशक्यत्वादन्वयव्यति रेकग्रहासम्भवात् । अत एव व्याप्यव्यापकभावग्रहोऽपि न सम्भवति । एवं अनुगतसामन्यानङ्गीकारे उत्सर्गापवादन्यायानुपपत्तिः । उत्सर्ग स्यापवादविषयमात्रविषयकत्वे विरोधेनान्यतरस्याप्रामाण्यापत्त्या अपवादविषयभिन्नविषयकत्वे उत्सर्गप्रमाणविषयत्वप्रसक्तिमत एवा पवादप्रमाणविषयतया प्रसिद्ध्यनुपपत्तेः । सामान्यधर्मपुरस्कारेणो त्सर्गप्रमाणप्रवृत्तत्वात् । एवं अनुगताकारप्रत्ययानुपपत्तिः स्यात् । न चान्यापोहविषयकत्वेन तदुपपत्तिः तस्याप्यननुगतत्वात् । अनुगतत्वे वा सामान्येन किमपराद्धम् विधिरूपप्रत्ययनिर्वाहकेणेति चेन्न।

गोसदृशो गवय इति प्रत्यक्षसिद्धेन सादृश्येनैव सर्वनिर्वाहसम्भवात् नानुगतत्वं सामान्यस्य कल्पनीयम् । अयं गौरित्युपदेशस्य व्याप्तिग्राहकस्य शक्तिग्राहकत्वात्तस्य चायं चैतत्सदृशाश्च गोशब्दवाच्या

इत्यर्थकत्वेनायं गोशब्दवाच्यः सत्सदृशत्वादित्यनुमनमुखेन शक्तिग्रहसम्भवात्। आप्तोपदेशगम्यव्याप्तौ दृष्टान्तानपेक्षणात् न दृष्टान्ताभावो दोषाय । तथा च पृथिव्यपृथिवीशब्दवाच्यत्वे गन्धवत्त्वमिव गोगोंशब्दवाच्यत्वे सादृश्यं लिङ्गं भवति। गोशब्दात् सर्वगोप्रतिपत्तावपि लिङ्गप्रकरणादिबलात् पिण्डविशेषे कार्यप्रतिपत्तिः सुसम्पादा । सादृश्यमपि नानुगतम्। न च तथात्वे सर्वव्यक्त्युपस्थित्यभावेन शक्तिग्रहानुपपत्तिः । प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन सादृश्यस्य प्रत्यासत्तिभूतस्य स्वरूपसतः सर्वव्यक्त्युपस्थापकत्वात् । सादृश्यस्य प्रत्यासत्तित्वादेव न शाब्दबोधेऽनुप्रवेशः । प्रत्यासत्तौ संयोगादौ तथा दर्शनात् । न्यायमते गोत्वप्रत्यासत्तेः गोत्वप्रकारकबोधजनकत्ववत् सादृश्यस्यापि स्वप्रयोजकगोत्वप्रकारकज्ञानजनकत्वात् । गोत्वस्य वाननुगतस्य ज्ञातस्य स्वाश्रयत्वस्वनिष्ठसादृश्यप्रतियोगिगोत्वाश्रयत्वान्यतरसम्बन्धेन प्रत्यासत्तित्वं सर्वव्यक्त्युपस्थापकत्वमिति न दोषः। प्रवृत्तिनिमित्ताननुगमेऽपि दण्ड्यादिशब्दानां व्युत्पत्तिदर्शनात् पितुः पाण्डित्ये पुत्रस्य पाण्डित्यस्येवानुगतस्यापि दण्डत्वेन दण्डादेरनुगमस्याभावात् । धर्मिप्रतियोगितया सम्बद्धस्य सादृश्यस्य ज्ञातस्य प्रत्यासत्तित्वं उपाधानत्वान्न शाब्दबोधे प्रवेशः । सादृश्यविशेषस्यैव विवक्षितत्वात् नाश्वादिषु प्रसङ्गः । तस्मात्सादृश्यस्यैव सर्वव्यक्त्युपस्थापकत्वस्यातिप्रसङ्गपरिहारकत्वस्य सम्भवात् व्याप्त्यादिग्राहकत्वमनुगतव्यवहारोत्सर्गापवादन्यायसम्पादकत्वञ्चेति सिद्धम् । अन्त्यविशेषे तर्कमते जातेरभावात् अनुगताश्रयोपाध्यभावात् तत्र विशेषशब्दव्युत्पत्तये व्यावृत्तिबुद्धिकारणत्वग्रहार्थं च सादृश्यमेवान्ततआश्रयणीयमिति ज्ञातव्यम्॥

२४. अनुगतस्य सामान्यस्य व्युत्पत्त्यादिग्राहकत्वे बाधकम्

अनुगतजातेरेव व्युत्पत्त्यादिग्राहकत्वे जात्यादिषु अनुगत जातेरभावे तत्र जातिशब्दव्युत्पत्त्यादिग्रहो न स्यात्। न चोपदेशाधीनः तत्र व्युत्पत्तिगहः जातेः शब्दवृत्तौ निमित्तत्वानङ्गीकारेण उपदेशस्यानुपयुक्तत्वात्। एवं व्यक्त्याादिशब्दव्युत्पत्तिरपि न स्यात्। व्यक्तित्वस्य जातित्वाभावात्। न च व्यक्तित्वसत्तयोरभेदः सद्व्यक्ति शब्दयोरपर्यायात्। पर्यायप्रवृत्तावेव सामान्यस्य निमित्तत्वात्। अन्यथा संयोगादिशब्दानां द्रव्यादिशब्दपर्यायत्वं स्यात्। तत्र जात्यङ्गीकारे चानवस्था। एवं स्वरूपशब्दादिष्वपि बोद्धयम्। ननु जातौ जात्यभावेऽपि जातिशब्दव्युत्पत्तेः नित्यत्वे सत्यनेकानुगतत्वोपाधिनिबन्धनत्वेन न जात्यङ्गीकारप्रयुक्तानवस्था। जातित्वरूपजात्यङ्गीकारेऽपि तस्याः स्वनिर्वाहकत्वान्न दोषः। एवं व्यक्तित्वस्वरूपत्वसमवायविशेषादिषु बोद्धयमिति चेन्न। क्वचित्सामान्यं निमित्तं क्वचन उपाधिः कुत्रचित् स्वरूपमित्यनेककल्पने कल्पनागौरवात्। योगेन सामान्यशब्दस्य सादृश्यवाचकत्वं रूढ्या तु अननुगतगुणादिष्विव सामान्यशब्द इति अननुगतत्वेन सामान्यशब्दवाच्यत्वानुपपत्तिः।

२५. वैशेषिकमते विशिष्टानुपपत्तिः

तदितरव्यावृत्तिसमानाधिकरणतद्व्यावर्तकत्वं विशेषणत्वम् उत्पले विद्यमानस्य नीलरूपस्य, पर्वतवृत्ताग्नेः। तदितरव्यावृत्त्यसमानाधिकरण तद्व्यवर्तकमुपलक्षणम्। नीलरूपगतं नैल्यमुत्पलस्य। कार्यान्वयित्वं विशेषणत्वं लम्बकर्णमानयेत्यत्र

लम्बकर्णयोः। तदनन्वयित्वमुपलक्षणत्वम्। चित्रगुमानयेत्यत्र गौः। तद्वाचकपदविभक्तिसदृश विभक्त्यन्तपदवाच्यं तद्व्यावर्तकं विशेषणम् तद्वाचकविभक्तिविसदृश विभक्त्यन्तपदवाच्यं तद्व्यवर्तकमुपलक्षणम्। स्वप्रत्याय्यव्यावृत्तिभावित्वं विशेषणत्वम् व्यावृत्यभावित्वमुप लक्षणत्वम्। विशेष्यप्रतियोगिकस्वनिष्ठभेदज्ञापकत्वमुपाधित्वम्। अग्निमतः विशिष्टस्य पर्वताग्निसम्बन्धभिन्नत्वेऽनुभवविरोधात्। अन न्यत्वे प्रत्येकशः धूमानुमानादौ वह्न्यादेः सिद्धत्वेन सिद्धसाधनात् पर्व तस्य अग्निसंयोगेन यःसम्बन्धः समवायः सः असिद्ध इति वक्तव्यम्। समवायस्यैकत्वाङ्गीकारेण पटतन्तुसमवायस्य प्रत्यक्षसिद्धत्वे तदभेदात् अस्यापि सिद्ध्या सिद्धसाधनतायाः दुर्वारत्वमेव। न च तन्तु पटादिपर्वताग्निसंयोगाद्युपाधिनिमित्तभेदसत्त्वान्न सिद्धसाधनतेति वाच्यम्। भेदाभेदयोरेकत्र विरोधात्। भेदस्यापारमर्थिकत्वे सिद्ध साधनम्। अनिर्वचनीयत्वे मायावादिसाम्यम्। औपाधिकत्वस्योपाधि जन्यत्वरूपत्वे समवायानन्त्यं दुर्वारम्। उपाधिगम्यत्वे अधिगम स्याप्रमात्वे च अनुमानस्याप्रामाण्यं च। एवं समवायस्य नित्यत्वे कुलाल व्यपारात्प्रागपि घटसमवायसत्त्वेन घटसत्त्वापत्त्या कुलाल व्यापारवैयर्थ्यम्। औपाधिकभेदस्तु पूर्वं निरस्तः॥

२६. स्वमते विशिष्टनिरूपणम्

अस्मन्मते तु विशिष्टं द्विविधं यावद्विशेष्यभावि अयावद्विशेष्यभावि चेति। तत्र प्रथमं विशेष्याभिन्नं सर्वज्ञत्वविशिष्टम्। अपर्याय शब्द वाच्यत्वादयश्च विशेषेण निर्वाह्याः। द्वितीयं विशेष्येण भिन्नाभिन्नम्। अग्निविशिष्टपर्वतः। आगन्तुकविशेषणसम्बन्धात् विशेष्यस्वरूपं

विशिष्टाकारं परिणमते । न च क्वचिद्भावस्य विशेष्यत्वं विशिष्टाकारस्याभावत्वं, विशिष्टाकारस्य भावत्वं विशेष्याकारस्याभावत्वं, तत्र विशिष्टस्य विशेष्यानतिरिक्तत्वे भावत्वाभावत्वयोः सङ्करः इति वाच्यम् । इष्टत्वात् प्रत्यक्षसिद्धत्वाच्च । एवं चेद्भावाभावविभागायोग इति चेत् विधिरूपतया प्रथमगोचरत्वानिषेधरूपतया प्रथमगोचरत्वरूपधर्माभ्यां तादृशविभागस्याभिप्रेतत्वात् । कारणस्य कार्यव्यतिरेकेणानुपलभ्यमानत्वात् । वस्तुनः कारणात्मना पूर्वं सत्वं कार्यात्मनाऽसत्त्वमवगन्तव्यम् । सर्वथा असतः सत्वं च व्याहतम् । इदं सर्वं प्रत्यक्षसिद्धम् ॥

२७.भेदस्य वस्तुस्वरूपत्वे बाधकोद्धारः

ननु भेदस्य वस्तुस्वरूपत्वं न युज्यते । विदारणस्य भेदस्य वस्तुस्वरूपत्वे तस्य विदारणापत्त्या तत्रापि भेदे विदारणे सति शून्यतैव स्यात् । भेदस्य वस्तुस्वरूपत्वे अभेदस्य भेदविरोधित्वेनैकत्वं न स्यात् । तथा चैकत्वसमाहारात्मकानेकत्वमपि न स्यात् । भेदस्य प्रतियोग्यनपेक्षत्वं स्यात् । वस्तुज्ञाने भेदज्ञानेन संशयविपर्ययोच्छेदः स्यात् । भेदस्य प्रतियोगिविशेषणकत्वेन वस्तुस्वरूपत्वे प्रतियोगिस्वरूपत्वापत्त्या अद्वैतवादापत्तिरिति चेन्न भेदशब्दस्यान्योन्याभावार्थत्वात् । विदारणार्थत्वेऽपि अवशिष्टत्वेन शून्यत्वापत्त्यसम्भवात् । भेदस्य वस्तुस्वरूपत्वेऽपि तद्घटकस्य न तत्स्वरूपत्वम् । नियमासिद्धेः । तस्मादसमञ्जसमेवंविधं वच इति सिद्धम् ॥

२८.ईश्वरज्ञानस्य सखण्डत्वस्वप्रकाशत्वादिसमर्थनं सुखसमर्थनम्

एवं वैशेषिकोक्तं ईश्वरस्याष्टगुणवत्त्वमयुक्तम्। प्रमाणाभावात्। अनन्तगुणवत्त्वे प्रमाणानां सत्त्वात्। तानि च मय्यनन्तगुणेऽनन्ते इत्यादीनि। न चोपचारकल्पना युक्ता। ईश्वरज्ञानं यदि निर्विशेषं स्यात् तदा सविषयकं न स्यात् तथा च सर्वविषयकज्ञानवत्त्वरूपसार्वज्ञं न स्यादिति।

एवमेव सर्वकर्तृत्वादिकं न स्यादिति बाधकतर्कसत्त्वात् ज्ञानस्य नाखण्डत्वादिकम्। एवमीश्वरज्ञानस्य स्वप्रकाशत्वानङ्गीकारे सर्वज्ञत्वं न स्यात् स्वज्ञानस्य विषयत्वाभावात्। ज्ञानद्वयेन निर्वाहे तज्ज्ञानस्य विषयत्वायोगः। एवं परम्पराङ्गीकारेऽनवस्था। एवं सुखं अपि ईश्वरेऽप्यङ्गीकार्यम्। ईश्वरः न सुखी दुःखरहितत्वात् यदि सुखी स्यात् तर्हि दुःखी स्यादिति तु श्रुतिविरुद्धम्। न च दुःखाभावविषयकत्वेनोपचारः बाधकाभावात्। साधकसहस्रसद्भावात्। ईश्वरस्यानुमानिकताया निरस्तत्वेन अनुमानादिविरोधानवकाशात्। एवमेव सविग्रहत्वादीनि बोद्धयानि॥

॥ ॐ ॥ नित्यमेव च भावात् ॥ ॐ ॥

२९. वैशेषिकमते सृष्ट्यनुपपत्तिः

किञ्च वैशेषिकमते कार्यं सदा भवेत्। परमाणोः समवायिकारणस्य नित्यस्य सर्वदा सत्त्वात्। तत्संयोगस्य नित्येश्वरेच्छानिमित्तकस्यापि नित्यं सत्त्वात्। नित्याया ईश्वरेच्छायाः सर्वदा सत्त्वात् अभिलषितकालात्पूर्वमपि कार्यसृष्टिः स्यात्। किञ्च द्व्यणुकद्युत्पत्तिः कदापि नस्यात् विनाशकारणस्येश्वरेच्छादेः सर्वदा सत्त्वात्। न च सृष्टिं

प्रति कालविशेषस्येच्छाविशेषस्य च कारणत्वान्न दोष इति वाच्यम् । कालादेरौपाधिकभेदस्यायुक्तत्वात् । स्वाभाविकस्यानङ्गीकारात् । अस्मन्मते तु काले स्वाभाविकभेदाङ्गीकारात् ईश्वरेच्छाया विशेषाङ्गीकारान्न दोषः ॥

न च कालविशेषस्य नित्यत्वे तद्दोषतादवस्थ्यम् । अनित्यत्वे कारणानुपपत्तिरिति वाच्यम् । प्रकृतेरेव कालं प्रत्युपादानत्वात् । ईश्वरस्यैव निमित्तकारणत्वात् । सर्वे निमेषा जज्ञिरे इत्यादिश्रुतेरत्र जागरूकत्वात् । न च कार्यसामान्यस्य कालकारणकत्वात् कालाभावेन कथं कालरूपकार्योत्पत्तिरिति वाच्यम् । कालातिरिक्तकार्ये कालस्य कारणत्वात् ।

॥ ॐ ॥ रूपादिमत्वाच्च विपर्ययादर्शनात् ॥ ॐ ॥

एवं चतुर्विधपरमाणूनां रूपवत्वादनित्यत्वं स्यात् । न च सावयवत्वमुपाधिः गुणादौ साध्याव्याप्तेः । न च द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वम् साधनव्यापकत्वात् । यदि रूपादिमत्वेऽपि परमाणूनां नित्यत्वं तर्हि घटादेरपि नित्यत्वं स्यात् । भौतिकत्वविशेषणात् नेश्वरे व्यभिचारः । ततश्च श्रुतिस्मृत्यपरिगृहीतत्वाद्वैशेषिकमतं न समञ्जसम् । अतश्चाविरुद्धः समन्वय इति सिद्धम् ॥

आनन्दतीर्थभगवच्चरणारविन्द
कारुण्यसत्तरिमहं गुरुकर्णधाराम् ।
आश्रित्य मध्वजयवागनुवादसिन्धुं
तर्तुं यथामति यते भगवत्प्रसत्त्यै ॥ १ ॥

भगवद्दर्शनार्थं हि शास्त्रार्थमननात्मिका ।
उपासनैषा विहिता तया प्रीणातु माधवः ॥ २ ॥

इति

श्रीजालिहाळ श्रीनिवासाचार्य विरचितम्

श्रीवैशेषिकनयन्यायसुधाकूतम्

परिसमाप्तम्

श्रीकृष्णार्पणमस्तु

Scanned with CamScanner

श्रीपूज्याचार्यरैव विरचिताः प्रकाशितग्रन्थाः

१. श्रीन्यायामृतार्णवः
२. श्रीन्यायसुधाकण्टकोद्धारः (प्रथमो भागः)
३. श्रीन्यायसुधाकण्टकोद्धारः (द्वितीयो भागः)
४. अभिनवशरदागमः
५. विजयीन्द्रविजयवैजयन्ती
६. विद्याविवेकः
७. सिद्धान्तभूषणम्
८. तत्वसंख्यानटीकाविवरणम्
९. श्रीगुरुवैभवमहाकाव्यम्
१०. अणुगुरुवैभवकाव्यम्
११. तीर्थक्षेत्रविलासः
१२. मानसपूजास्तोत्रम्
१३. तारतम्यमङ्गलाष्टकम्
१४. संक्षिप्तश्रीसूक्तविवरणम्
१५. श्रीवेङ्कटेश्वरकारुण्याख्यानम्
१६. श्रीनिवासकल्याणाष्टकम्
१७. विश्वम्भरस्तुतिः
१८. हयग्रीवहस्तावलम्बनस्तोत्रम्
१९. विष्णुलहरी
२०. हयग्रीवभुजङ्गप्रयातम्
२१. हयास्यकरावलम्बनस्तोत्रम्
२२. श्रीवैशेषिकनयन्यायसुधाकूतम्

तथा अनेकस्तोत्राणि